# Guru Tattvamalika

# गुरुतत्त्वमालिका

## Document Information

Text title : gurutattvamAlikA by Neelakantha Dikshita

File name : gurutattvamAlikA.itx

Category : deities_misc, gurudev, nIlakaNThadIkShita

Location : doc_deities_misc

Author : Nilakantha Dikshitar

Latest update : November 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# गुरुतत्त्वमालिका

दुःसाधे निखिलैः सुरैः स्मृतिभुवाप्यन्योन्यसङ्घट्टने
विश्लेषव्यथया द्वयोरपि वपुष्यर्धार्धशेषे शनैः ।
धीमद्भिस्त्वरया पुराणमुनिभिः पाणिग्रहे साधिते
दिष्ट्या यच्छिवयोरियत्यवसितद्वन्द्वं तदेकं नुमः ॥ १॥

नीलग्रीवमुमासखं त्रिणयनं रूपं यदाद्यं विभो-
र्दुःसंरोधभवप्रवाहलहरीकन्देन किं तेन नः ।
कारुण्यार्द्रकटाक्षवीक्षणकलानिर्धूतमायामलां
गीर्वाणेन्द्रगुरोः प्रसन्नललितां मूर्तिं स्मरामः पराम् ॥ २॥

साम्नो नास्ति गतिर्गिरामविषये दानं विरक्ते मुधा
भेदः किं क्रमते निरस्तनिखिलद्वैतप्रपञ्चे शिवे ।
इत्यालोच्य वशे विधातुमिव तं जग्राह दण्डं दृढं
गीर्वाणेन्द्रयतिः सुनिर्मलमतिः सन्त्यज्य सर्वाः क्रियाः ॥ ३॥

ध्यात्वा यं हृदि दण्डिनं विजहति स्वप्नेऽपि दण्डस्पृहां
यत्काषायपटस्मृतिः शमयते सद्यः कषायं नृणाम् ।
यं साक्षाद्भवरूपमेव भजतां न क्वापि भूयो भवो
गीर्वाणेन्द्रगुरुं तमेव निभृतं ध्यायेम गायेम च ॥ ४॥

तत्त्वस्थानकलापदाक्षरमनून् शैवान् षडप्यध्वनः
संशोध्यैव चिरन्तनैश्च गुरुभिः केचित्क्वचित्तारिताः ।
एकेनैव तु सारसङ्ग्रहकृतिव्यक्तेन मन्त्राध्वना
गीर्वाणेन्द्रगुरुर्विशृङ्खलमवत्याप्रौढमूढं जगत् ॥ ५॥

ब्रह्मिष्ठानपरान्मुनीनिव परिज्ञाय स्वमायस्यतः
कन्दर्पस्य समन्ततो निपतिता मोघाः शरौघा इव ।
दृश्यन्ते करुणाकटाक्षकमलग्रामा विरामाः शुचां
यस्येमे प्रणमेम तं भवगिरां वैदेशिकं देशिकम् ॥ ६॥

उद्भूतस्मितमुत्प्रबन्धकरुणाकल्लोललोलेक्षणं
त्रय्यन्तामृतवर्षि धर्षितपराहङ्कारशङ्कारवम् ।
एकं तद्वदनाम्बुजं कुलगुरोर्भक्त्या निदिध्यासतः
पञ्चाहो परितः स्फुरन्ति युगपद्वक्राणि चित्राणि मे ॥ ७॥

स्वीकर्तुं चरणोदकं चरणयोर्मार्ष्टुं रजः पावनं
मूर्ध्ना धारयितुं चिराय चरणौ हेमाब्जसामाजिकौ ।
स्वामिन् मे जनुषां शतैरपि तृषा नापैति जन्मैव तु
द्वैतीयीकमलभ्यमेव भवता भक्तेष्वचित्ते कृतम् ॥ ८॥

कृच्छ्राणि प्रदिशन् सकृच्छ्रवणतः कृच्छ्राणि हन्ति स्वतः
कर्माणि ग्रसते समूलमपि नः कर्माणि सिद्धिं नयन् ।
गीर्वाणेन्द्र इति श्रुतः श्रुतिषु यः सर्वासु निर्वाणदो
मन्त्रोऽयं चतुरक्षरो मम भवत्वाश्वासमाश्वासनम् ॥ ९॥

रूपं यस्य किलोद्वहन्नुपदिशत्यात्मैक्यमस्मादृशां
स्वे रूपे विमना मनागिव शिवोऽप्यश्रान्तमायाश्रये ।
तस्य श्रीगुरुराजराजपदवीभद्रासनाध्यासिनो
गीर्वाणेन्द्रयतेर्यतेमहि पदद्वन्द्वे नियन्तुं मनः ॥ १०॥

देवेभ्यः शतशो ददावमृतमित्यद्यापि या स्तूयते
मूर्तिं तामपि मोहिनीति हि विदुर्नारायणीयां जनाः ।
मोहग्राहहरा दृशैव शुभया मूर्तिस्तु नः श्रीगुरो-
गीर्वाणेन्द्र इति श्रुता तनुभृतां वृत्तेऽमृतं गृह्यताम् ॥ ११॥

आप्राणोपरमं प्रतीक्ष्यमथ च ज्ञानोपदेशः शिवात्
काश्यां—- भैरवभटा कर्षन्ति चेन्नान्तरा ।
गीर्वाणेन्द्रगुरोस्तु पादकमलं भक्त्या सकृत्पश्यतां
सिद्धं ब्रह्म करारविन्दवदिति व्यक्तं प्रविज्ञायताम् ॥ १२॥

राज्यस्थाजनि पादुका रघुपतेरित्येव चित्रीयते
तद्राज्यं कियदन्वभूयत कियत्कालं न तद्गण्यते ।
पश्यास्मद्गुरुपादुका भवमलावच्छेदविच्छेदिनी
ब्रह्मानन्दमहाधिराज्यपदवी दत्त्वे सकृच्चिन्तिता ॥ १३॥

निष्कृष्टाखिलदर्शनाः कियदितो विज्ञेयमित्याकुलाः

प्रापुस्तत्त्वमसीति वाक्यहृदयज्ञानाय यत्सन्निधिम् ।
प्रागालोच्य समुत्थितार्थकणिकामात्रे पुनः स्थापिते
निर्वृण्वन्ति विपश्चितः स भगवान् गीर्वाणयोगीश्वरः ॥ १४॥

न स्थातुं निभृतं क्षणोऽपि सुलभः पत्युः पदे श्रीगिरो
रावां कुत्र नियोक्ष्यते स गुरु रित्याज्ञाक्षरापेक्षयोः ।
तस्मादापतिते तनू अपि पदि] तस्य व्रतस्थे बला-'
दारूढे चरमाश्रमं पशुपतावस्मद्गुरोरात्मना ॥ १५॥

ज्ञानेन्दुयदि मौलिगो यदि मृगो भूत्वा करस्था श्रुतिः
सर्वज्ञो न भवेत्क इत्यपहसन् — योच्छित्तये ।
पाणावेणकिशोरकं परिहरन्मौलौ कलां चैन्दवीं
गीर्वाणेन्द्रगुरुर्भवन्विवृणुते सार्वैयमीशोऽधुना ॥ १६॥

सर्वानुश्रवसारसागरमहामाहेश्वराग्रेसरः
श्रीमच्छङ्करपादसूक्तिहृदयाविष्कारनिष्णातया ।
यः कृत्या निजया जहार हृदयं विश्वस्य विश्वस्य तं
गीर्वाणेन्द्रगुरुं कृताकृतभयोच्छेदात्प्रमोदामहे ॥ १७॥

अस्तद्वैतकलङ्कपङ्कमपि यज्योतिः परं ज्योतिषां
तच्चावृत्य निवृत्तशङ्कमधुनाप्युगाढरूढं तमः ।
यद्वाचा विलयं निरंशमयते गीर्वाणयोगीशितु
स्तस्य श्रीचरणारविन्दरजसा मार्जामि गीर्जामिताम् ॥ १८॥

आलिङ्गन्त्यपि सर्वभूतवशिनं यं वादिसङ्केतिताः
स्त्रीलिङ्गव्यतिषङ्गतोऽपि चकिता चिच्छक्तिगलिङ्गति ।
सम्पत्ति स किमीहते मम गुरुः श्रीकण्ठवैकुण्ठयोः
कैवल्यं स्वमिमौ कुतः कथयतस्तन्त्रेषु किं तेन तु ॥ १९॥

अन्तानन्तशरीरबन्धपरिवाहोपात्ततत्तच्छुभ
प्रारब्धार्थसमाजभाग्यफलितो यः शक्तिपातस्तरः ।
निर्णीतो यदि सोऽपि देशिकयापाङ्गप्रसङ्गाबह
स्तत्त्वं तर्हि गुरोः परं किमपि नेत्याख्यात बीतभ्रमाः ॥ २०॥

के लोके गुरवः –न्ति भुवि ये तिष्ठन्तु ते के पुनः
वर्णानां गुरवो द्विमात्रिकमुखा मूखोऽसि किं ब्रूमहे ।
अज्ञानप्रतिरोधको गुरुरिति ख्यातास्तु तन्त्रेषु के

गीर्वाणेन्द्रगुरुः स एव भगवानन्यं कमाचक्ष्महे ॥ २१॥

दृष्ट्या शिष्यतनौ गुरोः पतितया मौलिप्रभृत्यानखा-
दीक्षासु व्यवरोप्यते गरलवद्भारोऽखिलः पाप्मनाम् ।
सद्योनिर्मिततन्तुकम्बल वरन्यायेन किं ते जना
न्यस्ते मूर्ध्नि समुत्पतन्ति परथा हस्ते दृढ दण्डिना ॥ २२॥

– – पालनपरिक्लेशाः पितुः प्राश्नतो
बालस्य स्वयमास्थलग्नकबलग्रासो यथा केवलः ।
इत्थं श्रीगुरु- —
तद्दत्तामृतपाननिर्जितभवोदन्यास्तु धन्या वयम् ॥ २३॥

यस्मिन्न प्रभवन्त्यखण्डितमहास्वाच्छन्द्यवन्द्या गिर-
स्तत्र ब्र —– ब्रह्मणि ।
ताः कर्णे पतिता ममापि कतिचिद्धन्ये किमन्येन मे
निश्चिन्तोऽस्मि गतज्वरोऽस्मि निखिलं तीर्णोऽस्मि पूर्णोऽस्मि च ॥ २४॥

——- मनून्
न्यस्यामो जुहुमः स्तुमो विचिनुमो ध्यायेम भद्रासने ।
विस्रम्भेमहि किं तु तत्पदयुगं .. – .. –
गीर्वाणेन्द्रगुरोर्यथा हृदि तथा नत्यापि पक्का मतिः ॥ २५॥

कर्म ज्ञानमुपासना बहुविधा भक्तिः प्रपत्तिश्च वा
कामं जाग्रतु सार(भूतमवनौ यत्तत्परं) द्रक्ष्यताम् ।
सर्यारम्भपराङ्मुखस्य जरया भग्नस्य रुग्णस्य मे
गीर्वाणेन्द्रसरस्वतीचरणयोः चिन्ता पर तारिका ॥ २६॥

.. – .. – .. — ब्रह्माङ्कपर्यङ्किनीं
मन्दस्पन्ददृगन्तरान्तमहितब्रह्माच्युताखण्डलाम् ।
निष्प्रत्यूहवहद्दयारसमयं दिव्यं वपुः श्रीगुरो-
गीर्वाणेन्द्रसरस्वतेर्भगवतीं वन्दे परां देवताम् ॥ २७॥

अस्ति मे मृगामृगाङ्कलञ्छितं
वस्तु किञ्चन कुलक्रमागतम् ।
तत्तु दृष्टमिति .. - .. -
.. - .. – .. तामहम् ॥ २८॥

इति श्रीनीलकण्ठदीक्षितविरचिता गुरुतत्त्वमालिका समाप्ता ।

Proofread by Rajesh Thyagarajan

*Guru Tattvamalika*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*